# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (संज्ञापरिभाषम्)
पत्रसंख्या : I
पाठ्यांशनाम : हलन्त्यम् (1/3/3)
पाठ्यांशसंख्या : 6

पाठ्यांशस्य मुख्याः अंशाः :

1) सूत्रार्थः।
2) हलन्त्यम् – आदिरन्त्येनसहेता इत्यनयोः अन्योन्याश्रयदोषः।
3) दीक्षितमते अन्योन्याश्रयदोषपरिहारोपायः।
4) नागेशमते अन्योन्याश्रयदोषपरिहारोपायः।
5) भाष्यकारस्यमते अन्योन्याश्रयदोषपरिहारोपायः।

विषयसूची


1.0 : उपक्रमः
2.0 : सूत्रार्थः
3.0 : "हलन्त्यम्" "आदिरन्त्येन सहेता" इत्यनयोः अन्योन्याश्रयदोषः
4.0 : दीक्षितमते अन्योन्याश्रयदोषपरिहारोपायः
5.0 : नागेशमते अन्योन्याश्रयदोषपरिहारोपायः
5.1 : अन्योन्याश्रयदोषपरिहाराय प्रथमोपायः
5.2 : प्रथमोपायस्य प्रत्याख्यानम्
5.3 : अन्योन्याश्रयनिराकरणाय द्वितीयोपायः
5.4 : सूत्रत्रयकरणे पारायणादौ अदृष्टहानिः इति शङ्का
5.5 : अत्र समाधानम्
5.6 : द्वितीयोपायस्य प्रत्याख्यानम्
5.7 : अन्योन्याश्रयदोषपरिहारस्य तृतीयोपायः
5.8 : तृतीयोपायस्य प्रत्याख्यानम्
6.0 : अन्योन्याश्रयदोषनिराकरणे भाष्यमतम्
7.0 : अत्र कैयटव्याख्यानम्
8.0 : पाठ्यांशसंग्रहः


epathshala पाठशाला A Gateway to all Post Graduate Courses

## 1.0 उपक्रमः

“हलन्त्यम्” इति सूत्रं पाणिनीयाष्टाध्यायीग्रन्थे एकवारं पठितम् प्रथमाध्यायस्य तृतीयपादस्य तृतीयं सूत्रमिदम्। परन्तु सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन वारद्वयं सूत्रमिदं पठितम्। अन्योन्याश्रयदोषवारणाय “हलन्त्यम्” सूत्रमावर्त्य व्याख्यायते।

पाणिनिः अर्थद्वयबोधकम् एकमेवसूत्रं तन्त्रेण पठितवान्। तुल्यरूपत्वे सति अनेकार्थबोधकत्वं तन्त्रत्वम्। तदुक्तं वाक्यपदीये –

**आवृत्तिशक्तिभिन्नार्थे वाक्ये सकृदपि श्रुते**

**लिङ्गाद्वा तन्त्रधर्माद्वा विभागो व्यवतिष्ठते।**

यथा अक्षा भज्यन्ताम्, भुज्यन्तात्, दीव्यन्ताम् इत्यत्राक्षपदेन सकृदुच्चरितेन शकटाङ्ग - कमलाक्ष – देवनशालाकानां बोधः तन्त्रबलेन भवति, तथैव अत्रापि सकृदुच्चरितेन हलन्त्यम् इत्यनेन अर्थद्वयविषयको बोधः तन्त्रेण जायते।

आवृत्त्या च बोद्धृणामर्थद्वयस्य बोधो बोभूयते। प्रथमस्य “हलन्त्यम् सूत्रस्यार्थो भवति – हल्सूत्रस्यान्त्यमित् स्यात्। अनेन हल्सूत्रस्थस्य लकारस्य इत्संज्ञा भवति। ततः “आदिरन्त्येन सहेता” इति सूत्रेण हल्संज्ञा (प्रत्याहारः) सिध्यति। उपदेशेऽन्त्यं हल् इत् स्यादिति द्वितीयसूत्रस्यार्थो भवति। अनेन सूत्रेण “जस्-शस्” इत्यादिषु सकारस्येत्संज्ञा प्राप्नोति। अत्र इत्संज्ञावारणाय “न विभक्तौ तुस्माः” इति सूत्रं सार्थकं भवति।

यद्यत्र तन्त्रः आवृत्तिः वा न स्वीकरिष्यते तर्हि “हलन्त्यम्” इत्यत्र हल्पदेन हल विलखने इति धातुः, चतुर्दशं ‘हल्’ इति सूत्रं वा ग्रहीतुं शक्यते। तथा सति “न विभक्तौ तुस्माः” इति सूत्रं व्यर्थं स्यात्। यतो हि विभक्तिस्थस्य तवर्गस्य, सकारस्य

ePathshala पाठशाला A Gateway to all Post Graduate Courses

मकारस्य च केनापि सूत्रेण इत्संज्ञा न प्राप्ता। अतः इत्संज्ञानिषेधविधानं व्यर्थं स्यात्। प्राप्तौ सत्यां निषेधः सार्थकः। तस्मात् "न विभक्तौ" इत्यस्य सार्थक्याय "हलन्त्यम्" सूत्रे हल्पदेन व्यञ्जनग्रहणं स्वीकर्तव्यम्।

**2.0 सूत्रार्थः**

प्रथमान्तमेकपदं सूत्रम्। हलि अन्त्यम् हलन्त्यमिति सप्तमीतत्पुरुषसमासः "सप्तमी शौण्डैः" इति सूत्रे सप्तमीति योगविभागं स्वीकृत्य सप्तम्यन्तेन पदेन साकं सुबन्तं समस्यते। अथवा सह सुपा सूत्रेण सुप्सुपासमासः स्वीकरणीयः। "उपदेशेऽजनुनासिक इत्" इति सूत्रात् "उपदेशे" इति पदम् इत्पदञ्च अनुवर्त्तते।

अत्र सूत्रे हलन्त्यमिति पदमुद्देश्यम्। इत्पदं विधेयम्। 'हलन्त्यमि'ति संज्ञासूत्रम्। हलन्त्यमिति संज्ञी। इदिति संज्ञा।

**3.0 "हलन्त्यम् आदिरन्त्येन सहेता" इत्यनयोः अन्योन्याश्रयदोषः**

परस्परापेक्षत्वमन्योन्याश्रयत्वम्। स्वज्ञप्त्यधीनज्ञप्तिकत्वमन्योन्याश्रयत्वम्।

"हलन्त्यम्" इत्यत्र हल्पदार्थज्ञानं "आदिरन्त्येन सहेता" इति सूत्राधीनम्। हकारादिलान्तसमुदायघटकवर्णानां हल्पदेनबोधः प्रत्याहारसिद्धिं विना न सम्भवति। प्रत्याहारनिर्माणाय "आदिरन्त्येन सहेता" इत्यस्य वाक्यार्थबोधोऽपेक्ष्यते।

"वाक्यार्थबोधे पदार्थोपस्थितिः कारणम्" इति न्यायो वर्त्तते। "आदिरन्त्येन सहेता" सूत्रस्यार्थबोधः इत्पदशक्तिज्ञानं विना न सम्भवति। इत्पदशक्तिज्ञानञ्च "हलन्त्यम्" इति सूत्राधीनम्।

हल्पदार्थस्य ज्ञानम् इत्पदार्थज्ञानाधीनम्, इत्पदार्थस्य ज्ञानं हल्पदार्थज्ञानाधीनम्। अतः परस्परं ज्ञानम् परस्परज्ञानाधीनम्। अतः अन्योन्याश्रयो दोषः आपतति। अन्योन्याश्रयाणि कार्याणि न भवन्ति। "अन्योन्याश्रयाणि कार्याणि न प्रकल्प्यन्ते" इति भाष्यकारेण निगदितम्।

Pathshala पाठशाला A Gateway to all Post Graduate Courses

**4.0 दीक्षितमते अन्योन्याश्रयदोषपरिहारोपायः**

अन्योन्याश्रयदोषवारणाय दीक्षितेन "हलन्त्यम्" सूत्रस्यावृत्तिः कृता, हलन्त्यम्, हलन्त्यम् इति सूत्रद्वयं तेन पठितम्। "हल्" इति यत् चतुर्दशसूत्रं वर्त्तते तत्र अन्त्यमित् स्यात् इति प्रथमसूत्रस्यार्थः। अर्थात् हल्सूत्रस्य लकारस्येत् संज्ञा अनेन सूत्रेण विधीयते। इत्थमित् पदार्थज्ञानं संजातम्। ततः आदिरन्त्येन सहेता इति सूत्रस्यार्थबोधः सम्पद्यते। एवञ्च हल्प्रत्याहारस्य निष्पत्तिः जाता। ततः "हलन्त्यम्" इति द्वितीयसूत्रस्यार्थबोधो जायते।

'उपदेशेऽजनुनासिक इत्' इति सूत्रात् 'उपदेशे', 'इत्' इति पदद्वयमनुवर्त्तते। तथा च द्वितीयसूत्रस्यार्थो भवति उपदेशेऽन्त्यं हलित् स्यात्। अर्थात् उपदेशावस्थायां विद्यमानमन्त्यं हल् (व्यञ्जनवर्णः) इत्संज्ञकं स्यादिति सूत्रार्थः निष्पन्नः। इत्थमन्योन्याश्रयदोषस्य परिहारो भवति।

**5.0 नागेशमते अन्योन्याश्रयदोषपरिहारोपायः**

अन्योन्याश्रयदोषपरिहाराय नागेशेन उपायत्रयं प्रदर्शितं एवञ्च तस्य प्रत्याख्यानमपि कृतम्। अन्ते भाष्यमतं समर्थितम् -

**5.1 अन्योन्याश्रयदोषपरिहाराय प्रथमोपायः**

"हयवरट्" इति सूत्रादारभ्य 'हल्' इति सूत्रं यावत् (दश सूत्राणि) आवर्त्त्य 'शषसर्' इत्यन्तं समुदायमुद्दिश्य अर्थात् नवसूत्राणि उद्दिश्य दशमेनावर्त्तितेन 'हल्' इति सूत्रेण हल्संज्ञा विधेया।

एकैकस्यावर्त्तमानस्य क्रमवतां वर्णानां ज्ञाने उपयोगो भवति। अन्यस्य च आवर्त्तमानस्य संज्ञासंज्ञिभावे उपयोगः स्यादिति भावः। अर्थात् 'हयवरट्' सूत्रतः आरभ्य 'शषसर्' पर्यन्तं पठितानां वर्णानां हल्संज्ञा भवति। अतः 'आदिरन्त्येन

सहेता' इति सूत्रं विना संज्ञिनः हल्पदार्थस्य ज्ञानं सुलभम्। एवञ्च अन्योन्याश्रयदोषो न प्रसज्यते।

**5.2 प्रथमोपायस्य प्रत्याख्यानम्**

दशसूत्राणामावृत्तौ महद् गौरवं प्रसज्येत। 'हलन्त्यम्' इति एकस्य सूत्रस्य आवृत्तौ तु लाघवं भवति। गौरवत्वात् समाधानमिदं न समीचीनम्।

**5.3 अन्योन्याश्रयनिराकरणाय द्वितीयोपायः**

'उपदेशेऽजनुनासिक इत्' एकमित् संज्ञाविधायकं सूत्रं वर्त्तते। अनेन सूत्रेण अज्वर्णानामित् संज्ञा विधीयते। अयमच् वर्णः अन्त्ये तिष्ठतु आदौ वा भवतु यदि अनुनासिकः स्यात् तर्हि तस्य इत्संज्ञा भवति।

'हलन्त्यम्' इति द्वितीयमित्संज्ञाविधायकं सूत्रमस्ति। अनेन सूत्रेण अन्त्यहल्वर्णानामित्संज्ञा विधीयते।

'उपदेशेऽजनुनासिक इत्', 'हलन्त्यम्' इति सूत्रद्वयस्यस्थाने सूत्रत्रयमस्तु। तद् यथा –

a) उपदेशे इदन्त्यम्

b) अच्

c) अनुनासिकः

अत्र हल्ग्रहणं न कर्त्तव्यम्। उपदेशावस्थायाम् अन्त्यम् इत्संज्ञकं भवतीति प्रथमसूत्रस्यार्थः। अनेन सूत्रेण अन्त्यानां हल्वर्णानामच्वर्णानां च इत्संज्ञा भवति। अन्त्यमल् हल् वा अज् वा भवतु न कश्चिद् दोषः।

ततः द्वितीयं सूत्रं भवति – 'अच्' इति। पूर्वेण सूत्रेण अन्त्यस्य अचः इत्संज्ञा विधीयते। इदं सूत्रमनन्त्यार्थम्। यः अच् अन्ते नास्ति, तस्येत्त्वविधानाय इदं

Pathshala पाठशाला A Gateway to all Post Graduate Courses

सूत्रम्। यथा – अनङ्, तातङ् इत्यादौ नकारघटकाकारस्य, तकारघटकस्याकारस्य च अनेन सूत्रेण इत्संज्ञा विधीयते।

तृतीयं सूत्रं भवति – अनुनासिक इति। सर्वविधस्य अचः इत्संज्ञा पूर्वेण सूत्रद्वयेन सिद्ध्यति। अतः इदं सूत्रं किमर्थमिति जिज्ञासायां नियमार्थमेतद् भविष्यति। पूर्वसूत्रादचः इत्यनुवर्त्तते। अचोऽनुवृत्त्या अच्चेदित् भवति, तर्हि अनुनासिक एव इति नियमयति। अनेन निरनुनासिकस्य अचः इत्संज्ञा व्यापृत्ता भवति।

अतः रु शब्दे इति धातोः उकारस्येत् संज्ञा न भवति। यतो हि रुधातुघटकः उकारः नानुनासिकः।

‘अनन्तरस्य विधिर्भवति प्रतिषेधो वा’ इति न्यायो वर्त्तते। अनेन अनन्तरोक्तस्य ‘अच्’ इति सूत्रस्यैव बाधो भवति। अर्थात् ‘अच्’ इत्यनेन अनुनासिकस्य अचः इत्संज्ञेति नियम्यते। परन्तु “उपदेशे इदन्त्यम्” इत्यनेन निरनुनासिकस्याचः इत्संज्ञा न वारितेति शङ्का जागर्त्ति।

Pathshala पाठशाला A Gateway to all Post Graduate Courses

वस्तुतः एतादृशी शङ्का न करणीया। “अजनुनासिकः” इति एकमेव सूत्रं करणीयमासीत्। परन्तु ‘अच्’ ‘अनुनासिकः’ इति सूत्रद्वयं कृतम्। अतः योगविभागसामर्थ्यात् अनन्तरस्येति न्यायं बाधित्वा व्यवहितस्यापि नियमः। तथा च ‘उपदेशे इदन्त्यम्’, ‘अच्’ इत्युभयोः सूत्रयोः ‘अनुनासिकः’ इति सूत्रेण नियमः।

अनुनासिकश्चेद् इत्स्यात् तदा अजेवेति विपरीतनियमः कथं न स्यादिति प्रश्नः समुदेति। वस्तुतः ‘मिदचोऽन्त्यात् परः’ इति ज्ञापकाच्च विपरीतनियमो न स्यात्। ‘मिदचोऽन्त्यात्परः’ इति सूत्रस्य मकारस्येत्संज्ञकस्य कुत्रापि नियमेन वारितत्वादसत्वेन उदाहरणं नोपलभ्यते। अतः ‘मिदचोन्त्यात् परः’ इति सूत्रं व्यर्थं

स्यात्। यतो हि मकारः अनुनासिकः। मकारस्याच्त्वाभावात् तस्येत्संज्ञा न भविष्यति। मकारेत्संज्ञकः असम्भवः। अतः 'मिदचोऽन्त्यात् परः' इति सूत्रस्योदाहरणाभावात् सूत्रं व्यर्थं स्यात्। अतः विपरीतनियमस्य कल्पना असंगता स्यात्।

इत्थं सूत्रत्रयकरणेन हल्ग्रहणं नावश्यकम्। अन्योन्याश्रयश्च न भवति। हल्ग्रहणाभावात् लाघवमपि भवति। अतः सूत्रावृत्तिः नावश्यकी।

**5.4 सूत्रत्रयकरणे पारायणादौ अदृष्टहानिः इति शङ्का**

सूत्रद्वयस्य स्थाने सूत्रत्रयं विधाय हल्ग्रहणं च प्रत्याख्याय अन्योन्याश्रयपरिहारो न युक्तः। तथा सति सूत्रभेदेन पारायणे अदृष्टहानिः स्यात्। पाणिनीयव्याकरणस्य वेदाङ्गत्वात् वेदाङ्गपारायणजन्यं पुण्यफलमस्य पारायणे प्राप्यते। यदि सूत्रन्यासः क्रियेत तर्हि अपाणिनीयं भवतीति भाष्ये उक्तम्। अतः अदृष्टप्रयोजनं नोपलभ्येत इति शङ्का जागर्ति।

**5.5 अत्र समाधानम्**

वस्तुतः अस्य न्यायस्य लघुत्वेन अपाणिनीयत्वं न स्यात्। नागेशेन प्रदर्शितः सूत्रत्रयस्य न्यासः पूर्वसूत्रद्वयापेक्षया लघुभूतः। यतो हि हल्पदं निष्कासितम्। अतः अपाणीयदोषो नापतति।

तमेव सूत्रभेदं कथयन्ति यत्र तदर्थकमेव अन्यभूतं सूत्रं क्रियते अथवा तदपेक्षया अधिकं क्रियते। यदि तदेव सूत्रं संक्षिप्य प्रदर्श्यते, तर्हि सूत्रस्य भिन्नरूपता नास्ति, असौ सूत्रभेदः न दोषाय कल्प्यते। तदुक्तम् "अच उपसर्गात्तः" इति सूत्रभाष्ये – "सूत्रभेदं तमुपाचरन्ति यत्र तदेवाऽन्यत् सूत्रं क्रियते भूयो वा यदि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेदः"।

अतः अपाणिनीयदोषो नास्ति। यथा सम्भवं दृष्टं प्रयोजनं परिकल्प्य अदृष्टार्थकत्वं मन्तव्यम्। सति सम्भवे दृष्टप्रयोजनद्वारेण अङ्गानामदृष्टार्थकत्वं स्वीक्रियते। असति सम्भवे शुद्धमदृष्टार्थकम्।

### 5.6 द्वितीयोपायस्य प्रत्याख्यानम्

यद्यपि सूत्रत्रयकरणेन अन्योन्याश्रयदोषस्य परिहारो भवति। लाघवञ्च भवति। तथापि ज्ञानजनकमनोव्यापारगोरवत्वात् न ग्रहणीयोऽयं पक्षः। 'हलन्त्यम्' इति सूत्रस्य आवृत्तिकल्पनापेक्षया योगविभागनियमज्ञापकाश्रयणे गौरवं भवति।

वर्णानामभिव्यक्तये जनकः यः कण्ठाद्यभिघातः तस्यैवगौरवत्वेन गृह्यते। अर्थात् उच्चारणजन्यं गौरवमेव स्वीकर्तव्यम्, मानसिकव्यापारगौरवं गौरवं न भवतीति एतादृशी राजाज्ञा न वर्त्तते। अर्थात् ज्ञानजनकमनोव्यापारगौरवमपि स्वीकरणीयम्।

सूत्रावृत्त्यपेक्षया सूत्रत्रयनिर्माणम्, नियमाश्रयणम्, योगविभागसामर्थ्यात् न्यायस्य वाधनम्, विपरीतनियमवारणाय ज्ञापकस्य समाश्रयणम् इत्येषां मानसिकवृत्तिव्यापाराणां समाश्रयणे अतिगौरवं स्यात्। तदपेक्षया 'हलन्त्यम्' इति सूत्रमावर्त्त्य अन्योन्याश्रयदोषपरिहारे लाघवं भवति।

### 5.7 अन्योन्याश्रयदोषपरिहारस्य तृतीयोपायः

केषांचित् प्राचीनानां मतमिदम्। 'आदिरन्त्येन सहेता' इति सूत्रे 'सह + इता' इतादृशः सन्धिविच्छेदः कृतः। अत्र 'इत्' इति पदं नेत्संज्ञकम्, 'इता' इति न तृतीयान्तपदम्। अतः इत्पदार्थज्ञानाय 'हलन्त्यम्' इति सूत्रं नापक्ष्यते।

किन्तु 'इता' इति प्रथमान्तपदम्। इधातोः तृच्प्रत्यये 'इतृ' इति रूपं निष्पन्नम्। 'इतृ' शब्दस्य प्रथमाविभक्तौ एकवचने 'इता' इति पदं सिद्धम्।

इण्धातोः तृच्प्रत्यये ‘आङ्’ उपसर्गेण सम्बन्धे ‘ओमाङोश्च’ इति पररूपे प्रथमैकवचने ‘सहेता’ इति रूपं सिद्धम्। सह = समम् = आ = समन्तात् एति = बुद्धिविषयं गच्छतीति सहेता = मध्यमो वर्णः। अर्थात् सहेताशब्दस्यार्थो भवति मध्यमो वर्णः। अतः अन्योन्याश्रयदोषो न प्रसज्यते।

### 5.8 तृतीयोपायस्य प्रत्याख्यानम्

इता इत्यत्र इत्संज्ञार्थस्य अविवक्षा कृतेति वक्तुं न शक्यते। अन्योन्याश्रयदोषस्य परिहाराय यः उपायः भाष्यकारेण प्रदर्शितः, सः प्रयासो व्यर्थः स्यात्। तस्मात् प्रतीयते यत् कटी, वीत्यत्र प्रश्लिष्टात् इधातोः, “इङ् गतौ” इति धातोः सहाङ्पूर्वकात् तृच्प्रत्ययो न भवति। “इण् गतौ” इति धातोः तृच् प्रत्यये तु एङि पररूपम् इति सूत्रं बाधित्वा एत्येधत्यूठ्सु इति सूत्रेण वृद्धौ सहैता इति रूपं स्यात्। न तु ‘सहेता’ इति। ‘इक् स्मरणे’, ‘इङ् अध्ययने’ इति धातोरपि तृच्प्रत्यये सहेतारूपं च सिध्यति। यतोहि अध्युपसर्गः अनिवार्यः। अतः उक्तव्युत्पत्त्या मध्यमो वर्णः इत्यर्थः न प्रतीयते। आङः समन्तादित्यर्थस्य अन्वयोऽपि न संघटते। तथा च ‘आङ्’ उपसर्गः व्यर्थः।

सहेता पदं मध्यगवर्णेऽर्थे रूढिः इत्यपि वक्तुं न शक्यते। यतो हि रूढिरित्यत्र कोशादिकं किञ्चित् प्रमाणं नोपलभ्यते।

अतः गत्यन्तराभावात् सूत्रावृत्त्या अन्योन्याश्रयदोषं परिहरति दीक्षितः।

### 6.0 अन्योन्याश्रयदोषनिराकरणे भाष्यमतम्

भाष्ये अन्योन्याश्रयमाशङ्क्य हलन्त्यमित्संज्ञं भवति, लकारश्चेद्भवतीति वक्तव्यम् इत्युक्त्वा ‘एकशेषनिर्देशाद्वासिद्धम्’ – हल् च हल् च हल्, हलन्त्यमित् इत्युक्तम्।

अन्योन्याश्रयदोषवारणाय सम्पूर्णस्य सूत्रस्य आवृत्तिः भाष्यकारस्येष्टा, भाष्ये अन्योन्याश्रयदोषं वीक्ष्य हल् अन्त्यम् = चरमम् इत्संज्ञं भवति, लकारश्च इत्संज्ञको भवतीति वक्तव्यमिति समाहितम्। ततः 'एकशेषनिर्देशाद्वा सिद्धम्' इति प्रतिपादितम्।

एकशेषस्य स्वरूपं भवति – हल् च हल् च हल्। हलन्त्यमित् इत्युक्तम्।

कृतः एकशेषो यस्मिन् स कृतैकशेषः तथाभूतेन हल्पदेन अन्त्यशब्दस्य सम्बन्धसामान्यषष्ठ्या षष्ठीतत्पुरुषसमासो विधेयः। अत्र अवयवावयविभावे षष्ठी न स्यात्। यतो हि हल्सूत्रस्य अन्त्यमित्यर्थे अवयवावयविभावो मुख्यो भवति। परन्तु हल्प्रत्याहारबोध्यस्य हल्रूपस्य अन्त्यस्य चैक्यात् परस्परं भेदो नास्ति। अतः सम्बन्धसामान्ये निरूप्यनिरूपकभावे षष्ठीति नागेशेन प्रोक्तम्। तेन षष्ठ्यन्तस्य हल्पदस्य अन्त्येन सह समासो विहितः। अर्थात् हलः अन्त्यम् = हलन्त्यमिति।

द्वन्द्वान्ते = द्वन्द्वसमीपे श्रूयमाणस्य यथा प्रत्येकं सम्बन्धः, तथा अत्रापि अन्त्यशब्दस्य उभयत्र अन्वयः। यथा – हलन्त्यम्, हलन्त्यम् इति। अर्थात् हल्सूत्रान्त्यम्, हलरूपान्यञ्चेत्येवमन्वयः करणीयः।

हल्सूत्रस्य अन्त्यमित्यर्थे विवक्षिते भेदे षष्ठी प्रयुज्यते। परन्तु हल्रूपान्त्यमित्यत्र यः हल् तदेवान्त्यम् इति उभयोः भेदाभावात् षष्ठी कथं स्यादिति प्रश्नः समुदेति। अस्य निराकरणं नागेशेन इत्थं कृतम् –

"अन्त्ये राहोः शिरः इतिवत् षष्ठी"।

अर्थात् यः राहुः स एव शिरः राहुरेव शिरः ततो भिन्नं केतुपदवाच्यम्। तथा च राहोः शिरोरूपत्वे द्वयोः भेदो नास्ति। किन्तु भेदमारोप्य षष्ठी विधीयते। हलन्त्यमित्यत्रापि भेदरूपमारोप्य षष्ठी कल्पनीया।

उच्चारयिता वक्ता पाणिनिः एकशेषेण निर्दिशति। बोद्धा श्रोता तु तमर्थमावर्त्त्य जानाति। श्रोतॄणां बोधाय आवृत्तिरेव करणीया।

## 7.0 अत्र कैयटव्याख्यानम्

'हसमीपो लकार इत् हलरूपान्त्यञ्च' इति कैयटेन व्याख्या कृता। अर्थात् कैयटमते केवलं हल्पदस्यावृत्तिः करणीया। तथा च 'हस्य ल् = हल्' इति षष्ठीसमासं विधाय लकारसमीपे यो लकारः इत्येकोऽर्थः प्रदर्शितः। अपरस्यार्थः – हल्रूपान्त्यम् इति। एवञ्च अन्योन्याश्रयो नास्तीति भाष्यं व्याख्यातं कैयटेन।

वस्तुतः कैयटव्याख्यानं न युक्तम्। तथा सति हल् इत्संज्ञो भवति, हलन्त्यञ्चेद् भवतीति भाष्यकारः निर्दिशेत्। परन्तु एतादृशो निर्देशः नैव कृतः।

## 8.0 पाठ्यांशसंग्रहः

1) हलन्त्यमिति संज्ञासूत्रम्।
2) अनेन सूत्रेण इत्संज्ञा विधीयते।
3) हलन्त्यम् भवति उद्देश्यम् इत् पदं विधेयम्।
4) हलन्त्यमित्यत्र सप्तमीतत्पुरुषसमासः अथवा सुप्सुपा समासः।
5) हल्पदार्थस्य ज्ञानमित् पदार्थज्ञानाधीनम्, इत्पदार्थस्य ज्ञानं हल् पदार्थज्ञानाधीनम्। तथा च परस्परं ज्ञानं परस्पर ज्ञानाधीनम्।
6) अतः अन्योन्याश्रयदोषो भवति।
7) "अन्योन्याश्रयाणि कार्याणि न प्रकल्प्यन्ते" भाष्ये उक्तम्।
8) अन्योन्याश्रयदोषपरिहाराय 'हलन्त्यम्' इति सूत्रस्य आवृत्तिः कृता दीक्षितेन।
9) अन्त्योन्याश्रयदोषपरिहाराय 'हयवरट्' इति सूत्रादारभ्य 'शषसर्' इत्यन्तमुदिश्य हल्संज्ञा विधेयेति नागेशेन समाहितम्।

e-Pathshala पाठशाला A Gateway to all Post Graduate Courses

10) दशसूत्रावृत्तौ महद् गौरवं स्यादिति अयमुपायो न युक्तः।

11) सूत्रद्वयस्य स्थाने सूत्रत्रयं विधाय अन्योन्याश्रयो वारितः नागेशेन।

12) अत्र पक्षे ज्ञानोत्पादकस्य मनोव्यापारस्य यद् गौरवं तन्नादरणीयम्।

13) आ समन्तात् एति बुद्धिविषयं गच्छतीति व्युत्पत्त्या सहेताशब्दस्यार्थः मध्यगवर्णः इति स्वीकृत्य अन्योन्याश्रयः परिहृतः नागेशेन।

14) परन्तु अयमपि पक्षः प्रत्याख्यातः नागेशेन।

15) महाभाष्यकारस्य मते 'हलन्त्यम्' सूत्रे एकशेषनिर्देशात् अन्योन्याश्रयो न भवति।

16) हल् च हल् च = हल् इति। अर्थात् हल्सूत्रान्त्यम्, हलूपान्त्यञ्चेत्यर्थः।

e pathshala पाठशाला A Gateway to all Post Graduate Courses